काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये,
सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥
— विशदीक्रियताम्

चिरपरम्परावाहिनि काव्यसंसारेऽस्मिन् भारतीयशास्त्रकारैः प्रायः प्रत्येकं ग्रन्थस्य आदौ एव अनुबन्धचतुष्टयं प्रतिपाद्यते। अन्यथा – 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति रूढेः कस्यापि काव्ये प्रवृत्तिः एव न स्यात्। उक्तञ्च कुमारिलभट्टेन श्लोकवार्त्तिके —

"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥" इति।

— तस्मादेव नाट्यशास्त्रकृतो भरतात्प्रभृति भामहवामनदण्डिमम्मटादिभिः स्वस्वकृतौ आदावेव काव्यप्रयोजनमुल्लिखितम्। मम्मटेनापि काव्यस्य प्रयोजनषट्कं टीकितम्। तत्र द्वितयं सहृदयनिष्ठम्, अपरञ्च चतुष्टयं कविसहृदयनिष्ठमिति मन्मतिः। तथाह्युच्यते ~~काव्यक~~ काव्यप्रकाशे —

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥" इति।

— अत्र व्यवहारधीः, कान्तासम्मितोपदेशश्चेति फलद्वयं पाठकगतम्, यशोलाभः, अर्थावाप्तिः, अनिष्टविनष्टिः, सद्यःपरनिर्वृत्तिश्चेति चतुष्टयं कविसहृदयोभयगतम्।

१. यशःप्राप्तिः —

काव्यनिर्मितिद्वारा कालिदासभवभूतिदण्डिभारविबाणप्रभृतिभिः अमलिनं यशः प्राप्तम्। एवमाधुनिकैरपि रविकविप्रमुखैः कीर्तिः अधिगता। तदुक्तं भर्तृहरिणा —

" जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम्॥" इति।

— कालिदासादयः कवयः काव्यरचनया यथा ~~धन~~ यशः समवाप्तं, तथैव धनमपि, परन्तु तेषां सुख्यातत्वं तु धनापेक्षया यशःप्राधान्याद् एव। अत्रेदमवधेयं यद् वाल्मीकिव्यासदेवयोः दिव्यादिव्यप्रकृतेर्नात्र ग्रहणम्। तथाहि व्याख्यातं सुधासागरकृता —

" न खलु कालिदासस्य पित्रादि कुलं वा कश्चिज्ज्ञा-

Signature ..........................

नाति, न वा दानादिकं किञ्चित् प्रसिद्धम्, येन तादृशं यशः स्यात्, किन्तु काव्यमेव तत्कारणम्। ननु वाल्मीकिव्यासादीनामिवेति वक्तव्ये किं कालिदासादीनामित्युक्तमिति चेत्सत्यम्, किंत्वदिव्यप्रकृत्यपेक्षयेदमुक्तम्। दिव्यादिव्यप्रकृतिवाल्मीक्यादीनां तु न काव्यमात्रं यशःकारणमित्यवेहि।" इति।

— अतः काव्याद् यशःप्राप्तिः स्फुटः।

२. अर्थावाप्तिः —

काव्यतोऽर्थप्राप्तिरपि भवति। तथाहि धावकनामा कविः नृपतेः श्रीहर्षात् प्रचुरं धनमवाप्य राजानमेव कृतज्ञतावशाद् ग्रन्थकर्तृत्वेनोद्घोषयामास। ततश्च — 'श्रीहर्षादेर्धावकादीनामिव धनम्' इत्युच्यते टीकायाम्। एतेन काव्यनिर्माणेन तस्य दैन्यदशा दूरीभूता। आधुनिकेऽपि काले रवीन्द्रनाथादयः काव्यकृतिद्वारा नोबेलपदकसहितं प्रचुरमर्थं लेभिरे लभन्ते लप्स्यन्ते च।

३. व्यवहारज्ञानम् —

काव्यतो लोकाः कर्तव्यमकर्तव्यञ्च विदन्ति। नृपस्य, प्रजानां, पितॄणां, भ्रातॄणां, गुरूणां, शिष्याणां तथान्येषां सामाजिकजनानाम् आदर्शकरूपाणि कानीति काव्यादेव ज्ञायते। ततो हि काव्यानुशीलनद्वारा व्यवहारं विदित्वा व्यवहारनिपुणा भवन्ति जनाः। अत एवादौ कविना अवश्यं लोकव्यवहारः ज्ञेयः। तदुच्यते शास्त्रे —"लोको विद्या प्रकीर्णं च काव्याङ्गानि" इति।

४. अनिष्टविनाशः —

काव्यनिर्माणमाध्यमेन सर्वविधं दुःखमपाकर्तुं शक्यते। तथाहि मयूरनामा कविः शापात् कुष्ठरोगाक्रान्तःसन् सूर्यशतकं विरच्य भास्करप्रसादात् आरोग्यं लब्धवान्। एवं सहृदया अपि काव्यपाठेन यथायथं व्यवहारज्ञाः सन्तः भाविविपत्तेः परित्राणं लभन्ते। तथाह्युच्यते टीकायां —

'आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्' इति।

५.



Scanned by CamScanner

५. सद्यःपरनिर्वृतिः —

काव्याद् रत्यादिस्थायिभावानाम् आस्वादनात् विभावानुभावव्यभिचारिभावानां च योगाद्यानन्दो लभ्यते। स च परम आनन्दः। तत्र सर्वं ज्ञेयान्तरं विगलितं भवति। इयमेव परमानन्दप्राप्तिः काव्यस्य मुख्यं फलम्।

अतः मम्मटेनोक्तं टीकायां —

"सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरम् आनन्दम्" इति।

— अत्रेदमं बोध्यं यद् — एतत्फलं यथा सहृदयनिष्ठं तथैव कविगतमपि भवति इत्यत्र नास्ति काचिद् विप्रतिपत्तिः। अपि चैष आनन्दः ब्रह्मास्वादसहोदर इति कैश्चन आलंकारिकैः भणितम्। तथाहि झालकीकरटीकायामुच्यते —

'मोक्षकालिकब्रह्मानन्दसदृशमित्यर्थः' इति।

६. कान्तासम्मितोपदेशः —

कृत्याकृत्यरूपः प्रवृत्तिनिवृत्तिरूप उपदेशः काव्यात्प्राप्यते, न च वेदादिशास्त्रेभ्यः इतिहासपुराणादिभिश्च सुलभः स उपदेशः। काव्येन कान्तासम्मिततया सरसमुपदेशः दीयते, वेदे हि प्रभुसम्मिततया इतिहासादौ च सुहृत्सम्मिततया उपदेशः प्रयुज्यते। प्रभोः सुहृदश्च उपदेशापेक्षया कान्तावचनम् अधिकतरं मनोग्राहि भवति। अतः काव्यमुपादेयम्। काव्यादेव 'रामादिवद्वर्त्तितव्यं न रावणादिवत्' इत्युपदेशः समुपलभ्यते पाठकैः। तथाहि विश्वनाथेन धर्मार्थकाममोक्षरूपः चतुर्वर्गप्राप्तिरेव काव्यप्रयोजनत्वेन उररीक्रियते साहित्यदर्पणे —

"चतुर्वर्ग-फलप्राप्तिः सुखादल्पधियामपि,
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥" इति।

— परिशेषे तु एतदेव वक्तुं पार्यते यद्भामहेनापि तदीये काव्यालङ्कारे काव्यप्रयोजनं प्रपञ्चितं मम्मटेनेव —

"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च,
प्रीतिं करोति कीर्तिञ्च साधुकाव्यनिषेवणम्॥" इति

शिवम्।

Signature Soumyajit Sen

Scanned by CamScanner